अनुक्रमांकः ....................................
निरीक्षकस्य हस्ताक्षरम् ...........................

**Paper Code**
**MV-104**

# पतञ्जलिविश्वविद्यालयः

## परीक्षा – दिसम्बरमासः – 2018

## एम.ए. संस्कृत–व्याकरणम्, (सत्रम् : प्रथमसत्रम)
## चतुर्थपत्रम् – संस्कृतव्याकरणम् (घ)

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

**निर्देशः** अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति। इदं प्रश्नपत्रम् 'क' 'ख' 'ग' 'घ' इत्याख्येषु चतुषु खण्डेषु विभक्तं वर्तते। प्रत्येकखण्डे प्रदत्तानां विस्तृतनिर्देशाणामनुसारेणैव प्रश्नाः समाधेयाः।

### खण्डः क
### (दीर्घोत्तरीयप्रश्नाः)

**निर्देशः** पृष्टेषु चतुर्षु द्वौ द्वीर्घप्रश्नौ समाधेयौ । **(2×15=30)**

1. 'अचः परस्मिन् पूर्वविधौ' इत्यनेनानन्तरस्य विधिं प्रति स्थानिवद्भावः आहोस्वित् पूर्वमात्रस्य?
2. 'तपरस्तत्कालस्य' इति सूत्रं व्याख्यायताम्।
3. 'प्रत्ययस्य लुक्श्लुलुपः' इति सूत्रं भाष्यदिशा बोधयन्तु।
4. 'द्विर्वचनेऽचि' इति सूत्रस्य कानि प्रयोजनानि?

### खण्डः ख
### (लघूत्तरोयप्रश्नाः)

**निर्देशः** पृष्टेषु सप्तसु चत्वारो लघुप्रश्नाः समाधेयाः। **(4×5=20)**

1. 'वृद्धिर्यस्याचामादिस्तद्वृद्धम्' इति सूत्रस्य पदकृत्यं ज्ञापयन्तु।
2. 'स्थानिवदादेशो॰' इतिसूत्रं किमर्थमुच्यते?
3. 'प्रत्ययलोपे प्रत्ययलक्षणम्' इतिसूत्रं किमर्थं प्रणीयते?
4. 'समासप्रत्ययविधौ प्रतिषेधः' इति वार्तिकं व्याख्यायताम्।
5. भाव्यमानेन सवर्णानां ग्रहणं नेति कथं ज्ञाप्यते?
6. 'चङ्परनिर्ह्रासे चोपसङ्ख्यानं कर्त्तव्यम्' इत्यस्याभिप्रायं बोधयन्तु।
7. स्थानिवत्सूत्रकरणे के दोषाः?

### खण्डः ग
### (अतिलघूत्तरीयाः प्रश्नाः)

**निर्देशः** पृष्टेषु त्रयोदशसु दश अतिलघुप्रश्नाः समाधेयाः। **(01×10=10)**

1. 'तक्ष्णुहि' इत्यत्र को विकरणः?
2. 'अभूत्' इत्यत्र अस्तिसिचोऽपृक्ते इत्यनेनेडागमः कथं न?
3. 'घ्नन्तु' इत्यत्रोपधालोपः केन?
4. 'आशिशत्' इत्यत्र को लकारः?
5. 'आयन्' इति कुत्रत्यः प्रयोगः?
6. 'अहर्ददाति' इत्यत्र रुत्वं केन?

7. 'सौरी बलाका' इत्यत्र कः स्त्रीप्रत्ययः श्रूयते?
8. लघयतीत्यत्र णिचि वृद्धिकार्यं कथन्न?
9. 'अवधीत्' इत्यत्र हलन्तलक्षणावृद्धिः कथन्न?
10. समीपशब्दे कः समासः?
11. 'साचीनमभिधावन्तम्' इत्यत्र साचीनशब्दस्य कोऽर्थः?
12. 'ददौ' इत्यत्र कः प्रत्ययः?
13. 'मालभारिणी कन्या' इतिप्रयोगे पूर्वपदस्य ह्रस्वत्वं केन?

## खण्डः घ

## (वस्तुनिष्ठप्रश्नाः)

**निर्देशः** पृष्टा वस्तुनिष्ठप्रश्नाः समाधेयाः। **(01×10=10)**

1. कः प्रयोगः साधुः 'अधर्मं चरति' इत्यस्मिन्नर्थे ..............................
   (अ) आधर्मिकः (ब) अधार्मिकः
   (स) अधर्मिकः (द) अधर्मिणः
2. 'स्योनः' इत्यत्र कः प्रत्ययः ?
   (अ) उनः (ब) ऊनः
   (स) अः (द) नः
3. वृत्तिः कतिधा ?
   (अ) द्विधा (ब) त्रिधा
   (स) चतुर्धा (द) पञ्चधा
4. 'इको यणचि' इत्यत्र कतमा सप्तमी ?
   (अ) विषयसप्तमी (ब) निमित्तसप्तमी
   (स) परसप्तमी (द) सत्सप्तमी
5. 'मुचोऽकर्मकस्य गुणो वा' इत्यत्र किं प्रत्युदाहरणम् ?
   (अ) मोक्षयति गाम् (ब) मुमुक्षति गाम्
   (स) मुमोक्षते गाम् (द) सर्वाणि
6. 'सौरथी' इत्यत्र कः प्रत्ययः ?
   (अ) ङीष् (ब) ङीप्
   (स) ङीन् (द) णिनि
7. 'पञ्चेन्द्रः' इत्यत्र लुक् केन ?
   (अ) द्विगोर्लुगचि (ब) द्विगोः
   (स) अध्यर्धपूर्वद्विगोर्लुगसञ्ज्ञायाम् (द) द्विगोर्लुगनपत्ये
8. कः प्रयोगः साधुः ?
   (अ) माथितिकः (ब) मथितिकः
   (स) मिथातिकः (द) मथितकः
9. 'अरुदिताम्' इत्यत्रेड् केन ?
   (अ) किरश्च पञ्चभ्यः (ब) उदितो वा
   (स) आर्धधातुकस्येड् (द) रुदादिभ्यः सार्वधातुके
10. 'नैधेयः' इत्यत्र कस्मिन्नर्थे प्रत्ययः ?
   (अ) इदमार्थे (ब) आगतार्थे
   (स) अपत्यार्थे (द) जयत्यर्थे

--------------x--------------